# नव्यदेहात्मवादपरीक्षणविमर्शः
## (बदरीनाथशुक्लकृतनव्यदेहात्मवादसंभाव्यतासमर्थनम्)

**डा. वीरनारायण पाण्डुरङ्गी**
**वेदान्तनिकायाध्यक्षः,**
**कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गळूरु**

**उपोद्घातः**

विदितमेवेदं तत्त्वं यत् प्रख्यातनैयायिकैः बदरीनाथशुक्लमहोदयैः चार्वाकाभिमतदेहात्मवादसमर्थनेच्छुभिः तत्र सिद्धान्तिभिरादर्शितशङ्कानां समाधानाय नव्यदेहात्मवादः आस्थापितः सारनाथीयन्यायपरिचर्चायाम् इति ।

तत्र चार्वाकाभिमतदेहात्मवादात् अस्य वादस्य भेदे कारणं तु मनसोपि अङ्गीकार एव । देहस्यैवात्मत्वाङ्गीकारे तावत् अस्य देहस्य नाशे उत्तरजन्मसु कृतप्रणाश-अकृताभ्यागमादिदोषवारणार्थं मनस्सहितस्यैव शरीरस्य आत्मता स्वीकृता एतैः । तथा हि आत्मा नातिरिक्तद्रव्यं देहमनोभ्यामेव तत्साधनीयस्य निखिलप्रयोजनस्य निर्वर्तयितुं शक्यत्वात् इति एतेषां प्रतिज्ञावाक्यम् ।

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराख्याः ये आत्मविशेषगुणाः इति नैयायिकाभिमताः ते सर्वेपि देहमनसोरेव अन्यतरस्य गुणाः । तत्र एतेषु विशेषगुणेषु ये योग्यविशेषगुणाः ते सर्वेपि देहगुणाः भवन्ति बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाः । एतेषां मनोगुणत्वे मनसश्चाणुत्वेन तेषां गुणानामपि अप्रत्यक्षता स्यात् । देहस्य प्रत्यक्षत्वात् एतेषां षण्णामपि प्रत्यक्षता उपपन्ना । धर्माधर्मसंस्काराः त्रयः मनोगुणाः । मनसश्चाणुत्वेन तेषां गुणानामपि अप्रत्यक्षता इति गुणानां व्यवस्थाक्रमः ।

अत्र च एतैरेव अंशपञ्चके आक्षेपसमाधाने प्रदर्शिते । तत्र च बदरीनाथीयाक्षेपः, तत्र तदीयं समाधानं, तत्र राजारामशुक्लानामाक्षेपः, तत्र च मदीयं समाधानमिति क्रमशः प्रदर्श्यते ।

**प्रथमांशः**

**पार्थिवविशेषगुणानां पाक-अवयवगुणान्यतरजन्यत्वनियमभङ्गवारणम्**

**आशङ्का** – पार्थिवविशेषगुणाः रूपादयस्तावत् पाकेन वा अवयवगुणेन वा जायन्ते इति व्याप्तिर्दृष्टा । बुद्ध्यादीनां देहविशेषगुणत्वाङ्गीकारे अयं नियमो भज्यते । यतः पाकस्य सजातीयगुणध्वंसपूर्वकत्वात् अत्र देहे सजातीयगुणध्वंसासंभवात् तत्र पाकेन बुद्ध्यादि नोत्पत्तुं शक्नोति । शरीरायवयवानां हस्तादीनां जडत्वेन तत्र अवयवगुणैरपि देहे बुद्ध्याद्युत्पत्तिः न संभवति । अवयवभूतानां हस्तादीनां जडता, अवयविनश्च अजडता सर्वानुभवसिद्धैव ।

**बदरीनाथीयसमाधानम्** – पार्थिवविशेषगुणेष्वेवायं नियमः। न तु पार्थिवसामान्यगुणेषु। बुद्ध्यादयश्च देहस्य सामान्यगुणा एव न तु विशेषगुणाः इति न तादृशनियमभङ्गप्रसङ्गः। संख्यादेः अपेक्षाबुद्ध्यादित उत्पत्तिरिव बुद्ध्यादीनामपि प्रकारान्तरेण उत्पत्तिसंभवात्।

**द्वितीयांशः**

**बुद्ध्यादीनां पार्थिवसामान्यगुणत्वे यावच्छरीरभावित्वप्रसङ्गवारणम्**

**आक्षेपः** – ये सामान्यगुणाः ते यावद्द्रव्यभाविनो दृष्टाः। यथा परिमाणादयः। बुद्ध्यादीनां च देहसामान्यगुणत्वे तेषां यावद्द्रव्यभावित्वापत्तिः।

**बदरीनाथीयसमाधानम्** – संयोगादिसामान्यगुणानामपि अयावद्द्रव्यभावितादर्शनात् बुद्ध्यादिसामान्यगुणानामपि अयावद्द्रव्यभावित्वे बाधकाभावः।

**राजारामशुक्लाक्षेपः** – संयोगस्य सर्वदा द्रव्ये सत्त्वमिति नियमेन संयोगः व्यभिचारिस्थलत्वेन नोपादातुं शक्यते।

**राजारामशुक्लसमाधानम्** – तथापि संख्यादीनां सामान्यगुणानां तावत् अयावद्द्रव्यभावितादर्शनेन संयोगदृष्टान्तासंभवेपि संख्यादिदृष्टान्तेन पूर्वोक्तनियमभङ्गः इति बुद्ध्यादीनामपि अयावद्द्रव्यभावित्वं स्वीकर्तुं शक्यते।

**राजारामशुक्लाक्षेपः** – सुषुप्त्यादौ देहे ज्ञानसामान्याभावसंभवेन तत्काले देहे आत्मत्वव्यवहार अनुपपन्नः। तस्मात् अगत्यापि ज्ञानावच्छिन्नत्वेनैव शरीरस्यात्मत्वं स्वीकरणीयम्। ज्ञानावच्छिन्नशरीरे च ज्ञानस्य यावद्द्रव्यभावितैव दृष्टेति पूर्वोक्ताक्षेपसमाधाने व्यर्थे एव।

वस्तुतस्तु बदरीनाथनये मनोधिष्ठितशरीरस्य वा त्वक्संयुक्तमनोधिष्ठितशरीरस्य वा आत्मतेति कृत्वा तादृशशरीरे च ज्ञानादीनां यावद्द्रव्यभावित्वात् पूर्वोक्तशङ्कासमाधानयोरसंगतिरेव।

**मदीयं समाधानम्** – बदरीनाथनये तावत् प्राणवायुविशिष्टदेह एव आत्मा। तत्त्वमेव आत्मत्वव्यवहारप्रयोजकम्। न तु ज्ञानावच्छिन्नदेहः, त्वक्संयुक्तमनोधिष्ठितशरीरं वा। तस्य सुषुप्त्यादौ अभावेन तत्र नैयायिकमतेन सात्मकत्वव्यवहारस्य, बदरीनाथनयेन आत्मत्वव्यवहारस्य वा अनुपपत्तेः। परन्तु सुषुप्त्याद्यवच्छेदेनापि देहे आत्मत्वव्यवहारदर्शनात् प्राणवायुविशिष्टस्यैव देहस्य आत्मत्वमङ्गीकार्यम्। अत एव सुषुप्तौ आत्मत्वव्यवहारः, मरणोत्तरं तदभावश्चोपपद्यते। तथा च सुषुप्तौ प्राणवायुविशिष्टदेहसत्त्वेन आत्मत्वमस्त्येव। तादृशकालावच्छेदेन च ज्ञानसामान्याभावसत्त्वेन बुद्ध्यादीनां यावद्द्रव्यभावित्वापत्तिः, तत्परिहारश्च युक्तौ एव।

अत्र अयावद्द्रव्यभावित्वापादननिरसनप्रसङ्गे संयोगदृष्टान्तस्तु सूचनार्थमुपात्त एव। न तु स एव उपादेय इत्यभिप्रायेण। अत एव तत्रादिपदमुपात्तम्। तेन च स्नेह-संख्या-नैमित्तिकद्रवत्वादयः दृष्टान्ततया स्वीकर्तुं शक्यन्ते एव।

रूपसामान्यस्य तावत् यावद्द्रव्यभाविता वर्तते एव। यदि च रूपस्यापि सर्वथा अयावद्द्रव्यभावितेत्याग्रहः तदापि एकत्वसंख्या-पृथक्त्व-गुरुत्वादयः स्वीकर्तुं शक्यन्ते एव।

**तृतीयोंशः**

**बुद्ध्यादीनां सामान्यगुणत्वोपपादनम्**

**आक्षेपः** – ज्ञानादीनां तावत् विशेषगुणतैव?

**बदरीनाथीयसमाधानम्** – ज्ञानादीनां सामान्यगुणतैव स्वीकार्या। तथा हि – द्रव्यविभाजकोपाधिविशिष्टजातिमत्त्वे सति गुणत्वं विशेषगुणत्वम्। उपाधिवैशिष्ट्यं च जातौ स्वाश्रयवृत्तितावच्छेदकत्व-स्वानाश्रयवृत्तितानवच्छेदकत्वोभयसंबन्धेन। भवति च गन्धः पृथिवीविशेषगुणः। गन्धत्वजातेः द्रव्यविभाजकपृथिवीत्वाश्रयवृत्तितावच्छेदकत्वात्, पृथिवीत्वानाश्रयवृत्तितानवच्छेदकत्वाच्च। परन्तु न ज्ञानं विशेषगुणः, ज्ञानस्य पार्थिवादिशरीरचतुष्टयवृत्तित्वेन ज्ञानत्वजातेः द्रव्यविभाजकपृथिवीत्वाश्रयवृत्तितावच्छेदकत्वे सत्यपि पृथिवीत्वानाश्रयवृत्तितावच्छेदकत्वस्यापि सत्त्वात्।

अत्र च लक्षणे यदवच्छेदकत्वं प्रविष्टं तत् स्वरूपसंबन्धरूपम्। अत एव अधिकवृत्तिगुणत्वादिवारणाय स्वानाश्रयवृत्तितानवच्छेदकत्वसंबन्धोपादानम्।

वस्तुतस्तु लाघवेन अनतिरिक्तवृत्तित्वरूपावच्छेदकतायाः निवेशनीयत्वात् तत्र द्वितीयसंबन्धप्रवेशो निरर्थक एव। यदि च द्वितीयसंबन्धे अनतिरिक्तवृत्तित्वरूपावच्छेदकताप्रवेशेन द्वितीयसंबन्धमात्रदाने पृथिवीत्वानाश्रयजलवृत्तितानवच्छेदकपरिमाणत्वमादाय परिमाणे अतिव्याप्तिवारणाय प्रथमसंबन्धनिवेशः।

शब्दस्य विशेषगुणतासंपत्तये जातिपदं विहाय द्रव्यविभाजकोपाधीति। उपाधिविशिष्टोपाधिनिवेशे तु गन्धसंयोगोभयत्वस्य ग्रहणापत्तिः। तद्वारणाय उपाधिविशिष्टजाति इति।

अत्र च एतल्लक्षणानुसारेण पृथिवीविशेषगुणः नीलरूपं चित्रादिरूपं वा, न तु रूपसामान्यम्, रूपत्वस्य पृथिवीत्वाश्रयवृत्तितातिरिक्तवृत्तित्वेन अनतिरिक्तवृत्तित्वाभावात्। तथा च उपाधिविशिष्टजातिः नीलत्वादिरेव। अथ वा बदरीनाथरीत्या पाकजरूपत्वं वा, पाकजस्पर्शत्वं वा, पाकजमधुरत्वं वा उपाधिविशिष्टजातिः। गन्धत्वस्य केवलस्यापि उपाधिविशिष्टजातिता वर्तते एव, गन्धस्य पृथिवीमात्रवृत्तित्वात्।

**राजारामशुक्लाक्षेपः** – बदरीनाथोक्तदिशा पाकजानुष्णाशीतस्पर्शत्वादिकम् उपाधिविशिष्टजातिपदेन स्वीकर्तुं न शक्यते। पाकजानुष्णाशीतस्पर्शत्वस्य जातित्वाभावात्। यदि च तस्यापि जातिता तर्हि तन्तुद्वयसंयोगत्वस्यापि जातितया तन्तुद्वयसंयोगस्य विशेषगुणत्वापत्तिः।

**मदीयं समाधानम्** – पाकजानुष्णाशीतस्पर्शः पृथिवीविशेषगुणः इति केवलमुदाहरणमात्रम्। रूपत्वव्याप्या नीलत्वादिजातिरिव, पाकजत्वं विहाय केवलम् अनुष्णाशीतस्पर्शत्वजातिरपि स्पर्शत्वव्याप्या भवति। सा च उपाधिविशिष्टा। पृथिवीमात्रस्पर्शस्य परिगणनेन तादृशस्पर्शस्य इतरव्यावर्तकत्वसंभवात्। तस्मात् तत्र पाकजत्वादिविशेषणमनादेयमेव।

अथ अनुष्णाशीतस्पर्शस्य वायुसाधारण्यात् कथं पृथिवीविशेषगुणता इति चेत् तर्हि पाकाविरोध्यनुष्णाशीतस्पर्शत्वस्य तत्र जातिता इति स्वीकुर्मः। स्पष्टश्चायमनुपदमेव।

एवं च अनुष्णाशीतस्पर्शः पृथिवीविशेषगुणः। अथ वा वाय्ववृत्तिः विलक्षणः अनुष्णाशीतस्पर्शः पृथिवीविशेषगुणः। वाय्वृत्तीति स्वरूपकीर्तनम्। शीतस्पर्शः जलविशेषगुणः। उष्णस्पर्शः तेजसः। मृदुस्पर्शः वायुविशेषगुणः। अथ वा पाकविरोध्यनुष्णाशीतत्वव्याप्यजातिमादाय वायुस्पर्शोपि विशेषगुणः[1]।

तन्तुद्वयसंयोगत्वं तु न जातिः, अन्यतरकर्मजत्व-उभयकर्मजत्व-संयोगजसंयोगत्वानामेव तत्र जातित्वात्। अन्यथा तन्तुद्वयसंयोगत्व-तन्तुत्रयसंयोगत्व-तन्तुचतुष्टयसंयोगत्वादेः अनन्तस्य तादृशजातित्वकल्पनापत्तेः।

नीलरूपं पृथिवीविशेषगुणः। भास्वरशुक्लं तेजसि। जले तु विलक्षणम् अभास्वरं यत्किंचिद्रूपम् इत्यादिक्रमेण ऊह्यते।

**राजारामशुक्लाक्षेपः** – तर्हि ज्ञानादिव्यक्तीनामपि पृथिवीजलादौ भिन्नत्वात् तेषामपि विशेषगुणत्वापत्तिः।

**मदीयं समाधानम्** – नैवं ज्ञानादीनां विशेषगुणत्वापत्तिः। पृथिव्यादौ स्थितानां ज्ञानानां भेदकारणाभावात्। तत्र हि सन्त्यनेकानि विशेषगुणलक्षणानि। तथा हि किरणावल्यामिदमुक्तम्–"विशेषा एव वैशेषिकम्। (विनयादिभ्यष्ठक् इति स्वार्थिकष्ठक्प्रत्ययः) तस्य गुणाः स्वाश्रयव्यवच्छेदोचितावान्तरव्यापारविशेषवन्त इत्यर्थः।....तथा हि रूपं भास्वरत्वादिना, रसो मधुरत्वादिना, गन्धो गन्धत्वेनैव, स्पर्श उष्णत्वादिना, बुद्ध्यादयो

---

[1] किंच लीलावत्यां तावत् "विशेषगुणत्वं च शास्त्रीयां रूढिमाश्रित्यपंकजादिपदवत् तदुपाधिनियमिति अदोषः" इत्युक्तम्। तत्र हि न्यायलीलावतीप्रकाशे "स्वाश्रयसमानाधिकरणद्रव्यविभाजकोपध्यत्यन्ताभाव-समानाधिकरणगुणावृत्तिगुणत्वव्याप्यजातिमत्त्वम्" इति विशेषगुणलक्षणम्। तत्र न्यायलीलावतीप्रकाशविवृतौ "वायुस्पर्शोपि पाकविरोध्यनुष्णाशीतत्वव्याप्यजातिमादाय विशेषगुणः" इत्युक्तम्। न्या.ली.पृ.816.

बुद्ध्यादित्वेनैव स्वाश्रयमितरेभ्यो व्यवच्छिन्दन्ति'' इति। तथा च यस्य यद्रूपेण इतरव्यावर्तकता तद्रूपविशिष्टस्य तस्य विशेषगुणता इत्यर्थः संपन्नः। परन्तु वैशेषिकमतेन ज्ञानाश्रयस्य आत्मन एकजातीयत्वात् तस्य व्यावर्तका ज्ञानादयः विशेषगुणाः। बदरीनाथमतेन तु ज्ञानाश्रयाणां भिन्नभिन्नत्वात् ज्ञानादयः सामान्यगुणा एव भवन्ति। न हि अस्मदभिमतलक्षणयोगेन यस्य कस्यापि सामान्यगुणता विशेषगुणता वा। अपि तु व्यावर्तकत्वेनैव। तथा च वैशेषिकमतेन व्यवच्छेदकारिणामपि ज्ञानादीनां बदरीनाथमतेन व्यवच्छेदकारित्वाभावात् युक्तैव सामान्यगुणता।

किंच व्योमवत्यामपि विशेषगुणलक्षणमभिहितम् – ''स्वसमवेतविशेषविशिष्टत्वे सति स्वाश्रयैकजातीयव्यवच्छेदकारित्वं विशेषगुणत्वम्'' इति। यथा रूपस्य स्वसमवेतनीलत्वजातिविशिष्टत्वात् रूपाश्रयैकजातीयपृथिवीव्यवच्छेदकत्वाच्च विशेषगुणता। कीदृशश्च तादृशः ज्ञानसमवेतः धर्मः, यद्विशिष्टा ज्ञानादयः स्वाश्रयं व्यवच्छिन्दन्ति?। तस्माद्युक्तैव ज्ञानादीनां सामान्यगुणता, रूपादीनां विशेषगुणतेति।

तस्मादेव च सामान्यगुणा इति विशेषगुणा इति च विभागस्सूपपन्नः। अन्यथा अव्यवच्छेदकारिणामपि ज्ञानादीनां विशेषगुणत्वे किमपराद्धं संख्यादिरव्यवच्छेदकैः सामान्यगुणैः।

सामान्यगुणता अनुशिष्टा किरणावलीकारेण – ''सामान्यं साधर्म्यं तद्रूपा गुणाः, न स्वाश्रयव्यवच्छेदाय प्रभवन्तीत्यर्थः'' इति।

**अत्रेदमवधेयम्** – बदरीनाथैः विशेषगुणानां नूतनलक्षणकरणापेक्षा एव नासीत्। यतः किरणावली-व्योमवत्यादिलक्षणानुसारेणापि नीलरूपादिकमेव विशेषगुणः। न तु रूपमात्रमिति कण्ठतस्तल्लक्षणकारैरेव उक्तम्। तथैव तल्लक्षणानुसारेणापि ज्ञानादीनां पार्थिवजलीयादिदेहस्थानां सामान्यगुणतापि सेत्स्यत्येव। बदरीनाथनये आश्रयाणां भिन्नजातीयत्वात्। ज्ञानादीनां गुणानां स्वाश्रयमात्रं पार्थिवादिदेहचतुष्टयं प्रति व्यवच्छेदकत्वात्। अत एव अणुपरिमाणस्य सामान्यगुणता उक्ता व्योमशिवाचार्येण, तस्य पार्थिवादिपरमाणुचतुष्टयव्यवच्छेदकत्वादिति। तदित्थं बदरीनाथैः प्राचीनलक्षणानि दृष्ट्वा नवीनलक्षणं कृतम् अथ वा न इति अहं संदेह्मि। तथापि तेषां लक्षणं प्राचीनलक्षणाविरुद्धमित्यंशः बदरीनाथानां प्रतिभातिशयद्योतकोस्ति।

अत एव विशेषगुणत्वस्य व्यवच्छेदकत्वनिबन्धत्वात् अव्यवच्छेदकानां पार्थिवादिदेहचतुष्टयवृत्तिज्ञानादीनामपि अनुमानैः विशेषगुणतासाधनमनुपपन्नमेव। यदि चापि तेषां विशेषगुणतासाधनमभीष्टं तदा प्रथमतः ज्ञानादीनाम् आत्ममात्रवृत्तिता साधनीया। तदा च तेषां ज्ञानादीनाम् आत्मत्वजातीयव्यावर्तकत्वात् स्वयमेव विशेषगुणता सेत्स्यति।

तथापि इदानीं विशेषगुणतासाधकानुमानेषु दोषा उद्भाव्यन्ते। तथा हि – बुद्ध्यादयो न सामान्यगुणाः, चक्षुरग्राह्यत्वे सति योग्यगुणत्वात्, रसवत्, इत्यनुमाने तावत्

स्वाश्रयैकजातीयव्यवच्छेदकत्वमुपाधिः। अस्योपाधेः रूपादौ साध्यव्यापकत्वात्, पक्षे ज्ञानादौ साधनाव्यापकत्वात्।

किंच प्रतिपक्षानुमानमपि, बुद्ध्यादयो न विशेषगुणाः, पृथिव्यादिचतुष्टयवृत्तित्वात्, संख्यावत् इति।

एताभ्यामेव दोषाभ्यां, ज्ञानादयो विशेषगुणाः, एकेन्द्रियग्राह्यत्वे सति गुणत्वात्, रूपवत् इत्यनुमानमप्यसाधकम्।

बुद्ध्यादयो न पृथिव्यादिचतुष्टयविशेषगुणाः, अवयवगुणारम्भकत्वसमानाधिकरणगुणत्वव्याप्यजात्यभावात्, शब्दवत् इत्यनुमाने प्रतिपक्षानुमानमिदम् — बुद्ध्यादयः पृथवीगुणाः, शब्दभिन्नत्वे सति एकेन्द्रियग्राह्यत्वात् नीलरूपवत्, अथ वा बुद्ध्यादयः पृथव्यादिचतुष्टयान्यतरगुणाः, शब्दभिन्नत्वे सति एकेन्द्रियग्राह्यत्वात् इति। विशेषगुणत्वनिराकरणमसंगतं च।

बुद्ध्यादयो न मनोगुणाः, प्रत्यक्षत्वात् रूपवत् इत्यनुमाने च धर्माधर्मभावनाः न प्रत्यक्षद्रव्यगुणाः, अप्रत्यक्षत्वे सति विशेषगुणत्वात् इति प्रतिपक्षानुमानम्।

तदित्थमनुमानैः ज्ञानादीनां विशेषगुणतासाधनं न युज्यते।

**चतुर्थांशः**

**मनसो बहिरिन्द्रियतासाधनम्**

बुद्ध्यादीनामपि शरीरगुणत्वात् बाह्यशरीरवृत्तिज्ञानादिगुणग्राहकत्वात् बहिरिन्द्रियतैव। परन्तु मनसः शरीरान्तर्वर्तितया अन्तरिन्दियत्वव्यपदेशो युज्यते।

अथ वा ज्ञानादीनां शरीरगुणत्वेपि शरीरस्यान्तरेव वर्तमानत्वात् तद्ग्रहणं मनसैव भवति।

**आक्षेपः** — परिमाणादिव्याप्यवर्तिगुणानां केनेन्द्रियेण ग्रहणं भवति। शरीरान्तर्वर्तमानरूपादीनां च मनसा ग्रहणं किं न भवति? इति च।

**समाधानम्** — परिमाणादीनां च चक्षुस्त्वग्भ्यामेव ग्रहणं भवति। एवम् बहिरिन्द्रियत्वाविशेषेपि चक्षुषः रसग्रहणे असमर्थता इव, बहिरिन्द्रियत्वाविशेषेपि मनसो रूपादिग्रहणे असमर्थता इति युक्त एव विभागः।

**आक्षेपः** — देहगुणानां रूपादीनां स्वकीयपरकीयोभयेन्द्रियग्राह्यत्वात् ज्ञानादीनामपि देहगुणानां परेन्द्रियग्राह्यत्वापत्तिः।

**समाधानम् —** शरीरगुणत्वाविशेषेपि ज्ञानादीनां शिरस्यन्तर्वर्तित्वात् न परेन्द्रियेण संनिकर्ष इति तेषामग्रहणमुपपद्यते।

**पञ्चमांशः**

**अत्रार्थे न्यायसूत्रसंमतिप्रदर्शनम्**

इच्छाद्वेषसुखदुःखज्ञानान्यात्मनो लिङ्गम् इति न्यायसूत्रमपि (न्या.सू.1.1.10) अस्मिन् विषये प्रमाणम्।

यद्यप्यत्र सूत्रे केवलम् इच्छादयः आत्मलिङ्गत्वेनोक्ताः, न तु त एवात्मगुणाः इति। तथा च इच्छाद्वेषसुखदुःखज्ञानानि यत्र सन्ति तत्रैवात्मतवव्यवहारः इति अभ्युपगन्तुं कथं शक्यते इति शङ्का जागर्ति।

तथापि न्यायभाष्यादिदिशा विचार्यमाणे इदं प्रतीयते। इदं सूत्रं तु आत्मनः अनुमानेन साधनाय प्रवृत्तम्। तत्र च हेतवः ये भवन्ति ते च प्रत्यक्षाः इति प्रत्यक्षैर्हेतुभिः आत्मसाधनमिष्टम्, न तु अप्रत्यक्षैर्हेतुभिः धर्माधर्मसंस्कारैः। केवलं प्रथमतः प्रत्यक्षहेतुभिः आत्मसाधनानन्तरमेव धर्मादीनां तत्र कल्पना शक्यते। तथा च यत्र एते प्रत्यक्षहेतवः सन्ति स एवात्मा इति न्यायसूत्रतात्पर्यम्। स च आश्रयः देहादिरूपो वा भवतु अतिरिक्तो वा इत्यन्यदेतत्। तथा च न्यायसूत्रेणापि ज्ञानाद्याश्रयः आत्मेति साधनात्, तस्य च ज्ञानाद्याश्रयस्य अस्माभिः शरीरत्वसाधनात् शरीरमेवात्मा इति सिद्धम्।

**उपसंहारः**

तदित्थं बदरीनाथमहाभागानां मतमुपपन्नमेव प्रतीयते। परन्तु अत्र किंचिदिव परिवर्तितं चेदितोपि तदुपपन्नतरं भवति। यथा देहे ज्ञानादिगुणान्निवार्य ते सर्वे गुणाः मनस्येवाङ्गीक्रियन्ते चेत् अनुभवसंस्कारयोः अनुभवसुखदुःखादीनां च कार्यकारणभावोपि समवायेनैवोपपद्यते। न तत्र स्वाश्रयविजातीयमनस्संयोगरूपपरंपरासंबन्धकल्पनापेक्षा।

कथं मनोगुणत्वे ज्ञानादीनां प्रत्यक्षता स्यादिति चेत् स्वभाववैचित्र्यादेव इति ब्रूमः। आन्तरप्रत्यक्षे आश्रयप्रत्यक्षता न तन्त्रमित्यपि।

वस्तुतः न ज्ञानादीनां प्रत्यक्षता इत्येव युक्तम्। प्राणिमात्रे यस्य कस्यापि अहं ज्ञानं साक्षात्करोमि इति प्रत्ययाभावात् इति।

**उपयुक्तग्रन्थसूची**

**आचार्यबदरीनाथशुक्लाभिमतनव्यदेहात्मवादपरीक्षणम्** ले.राजारामशुक्लः, सारस्वती सुषमा, ज्ये.भा.मार्ग.फा.पू. 2053 विक्रमसंवत्सरः, वाराणसी

**किरणावली** द्र0 प्रशस्तपादभाष्यम्

**न्यायसूत्रम्** भाष्य-वार्तिक-तात्पर्यटीका-वृत्तिसहितम् संपा.अमरेन्द्रमोहनतर्कतीर्थ-तारानाथन्यायतर्कतीर्थौ, कलकत्ता संस्कृतसिरीस् 18, कल्कत्ता.

**न्यायलीलावती** प्रकाश-विवृति-कण्ठाभरणोपेता, संपा. हरिहरशास्त्री, चौखम्बासंस्कृतसिरीस् 64. वाराणसी, 1991.

**प्रशस्तपादभाष्यम्** किरणावल्युपेतम्, संपा.जे.एस्.जेट्लि, गायकवाड् ओरियण्टल् सिरीस्,154, बरोडा, 1971.

**प्रशस्तपादभाष्यम्** 1 व्योमवती-सूक्ति-सेतुसहितम्, संपा.ढुण्ढिराजशास्त्री, चौखम्बा संस्कृतसिरीस् 61, वाराणसी 1924-31.

**व्योमवती** द्र0 प्रशस्तपादभाष्यम् 1